CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 903

Title Gaṇapatipūjā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 903 Subject: Stotra.

Title: Gaṇapati pūjā

Author: – Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 7.6" by 4.1" Extent: 3 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

श्रीगणेशायनमः॥ अथगणपतिपूजालिख्यते॥ नित्यविधिंसमाप्य॥
इहाद्येतिदेशकालौस्मृत्वाममाशेषविघ्ननिवारणार्थंयथामिलितो
पचारैःगणपतिपूजनमहंकरिष्ये॥ रक्तचंदनेनअष्टदलंकृत्वातस्मि
न्नष्टदलेगणपतिस्थापनं॥ ॥आवाहनमंत्रः॥ ॐभूर्भुवःस्वःमहाग
णपतेसिद्धिबुद्धिसहितसवाहनसायुधसपरिवारइहागच्छ॥ गणानां
त्वेतिप्रजापतिरृषिःयजुःमहागणपतिर्देवतागणेशावाहनेविनियो
गः॥ गणानांत्वागणपतिं हवामहेप्रियाणांत्वाप्रियपतिं हवामहे।
निधीनांत्वानिधिपतिं हवामहेवसोमम॥ ॐनमोगणपतयेसिद्धि १

बुद्धिसहितायसवाहनायसायुधायसपरिवारायइमासनं॥ अर्घपाद्यमं
त्रः॥ उमासुतनमस्तुभ्यंविश्वव्यापिसनातन॥ विघ्नौघंछिंधिसकलंअ
र्घपाद्यंददामिते॥ अथचंदनमंत्रः॥ विनायकायशूरायवरदायगजा
नने॥ उमासुतायदेवायकुमारगुरवेनमः॥ अथधूपमंत्रः॥ उमोत्तमां
गसंभूतदानवानांवधायवै॥ अनुग्रहायलोकानांमदेवःपातुदेवराट्
॥ अदीपमंत्रः॥ परंज्योतिप्रकाशायसर्वसिद्धिप्रदायक॥ दीपंतुभ्यंप्रदा
स्यामिमहादेवात्मनेनमः॥ अथनैवेद्यमंत्रः॥ पक्वान्नैश्चविविधैश्चमो
दकैःखंडमिश्रितैः॥ विचित्रान्नैश्चशाकैश्चगृहाणपरमेश्वर॥ अथवि

शेषार्घः॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंती प्रचोदयात्॥
सुभगायै विद्महे काममालिन्यै धीमहि॥ तन्नो गौरी प्रचोदयात्॥ रूपं दे
हि जयं देहि भाग्यं भगवन् देहि मे॥ पुत्रान् देहि धनं देहि सर्वान् कामांश्च दे
हि मे॥ अथ प्रार्थना॥ विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सक
लाय जगद्धिताय॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ
नमो नमस्ते॥१॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय
सुरेश्वराय॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय न
मो नमस्ते॥२॥ अथ नमस्कारः॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः॥ २

नमस्ते रुद्ररूपाय करिरूपाय ते नमः॥ अथ ध्यानं॥ उद्यद्दिनेश्वररुचिं नि
जहस्तपद्मैः पाशांकुशाभयवरान् दधतं गजास्यं॥ रक्तांबरं सकलदुःख
हरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामं॥१॥ पश्चात्जपः॥ ततो जप
निवेदनं॥ ततः स्तुतिः॥ ॥श्रीः॥ श्रीत्रिपुरसुंदरीप्रसादोस्तु॥ ॥छ॥